अत्र प्रतिग्रहे राजन्! विक्रीता जाह्नवी भवेत्॥
विक्रीतायाञ्च जाह्नव्यां विक्रीतोऽभूज्जनार्द्दनः।
जनार्द्दने च विक्रीते विक्रीतं भुवनत्रयम्॥
कोऽपि न चाणकर्त्तास्य निःसम्बन्धप्रसङ्गतः॥”
तत्र कर्त्तव्यानि यथा,—
“दीक्षाञ्च देवपूजाञ्च जपं गङ्गातटे चरेत्।
मुख्यवासः पिधायापि सावित्रीजपमाचरेत्॥
श्राद्धञ्च तर्पणञ्चैव परोपकारकर्म्म च।
परोद्देशञ्च मनसा व्यक्तद्रव्यस्य दापने।
स्तवपाठञ्च मौनञ्च नीचालापविवर्ज्जनम्॥
केवलं वारिपानञ्च कर्त्तव्यं ब्रह्मभावतः।
एतानि किल कर्म्माणि क्षेत्रे नारायणे चरेत्॥”
इति वृहद्धर्म्मपुराणे ४५ अध्यायः॥
अवशिष्टं गङ्गाशब्दे द्रष्टव्यम्॥
नारायणतैलं, क्ली, (नारायणाख्यं तैलम्।) औषधपक्वतैलप्रभेदः। तत्त्रिविधम्। स्वल्पं वृहत् महच्च। यथा,—
“विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः।
प्रसारण्यश्वगन्धा च वृहती कण्टकारिका॥
वला चातिवला चैव श्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत्।
शतपुष्पा देवदारु मांसी शैलेयकं वचा॥
चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम्।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥
एषां द्विपलिकान् भागान् पेषयित्वा विनिःक्षिपेत्।
शतावरी रसञ्चैव तैलतुल्यं प्रदापयेत्॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्॥
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते।
अश्वो वा वातसंभग्नो गजो वा यदि वा नरः॥
पङ्गुलः पीठसर्पी च तैलेनानेन सिध्यति।
अधोभागे च ये वाताः शिरोमध्यगताश्च ये।
दन्तशूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला।
क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः।
वधिरा लल्लजिह्वाश्च मन्दमेधस एव च।
अल्पप्रजा च या नारी या च गर्भं न विन्दति॥
वातार्त्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा।
एतत्तैलवरं तेषां नाम्ना नारायणं स्मृतम्॥”
इति स्वल्पनारायणतैलम्॥ १ ॥ * ॥
“शतावरी चांशुमती पृश्निपर्णी शटी वला।
एरण्डस्य च मूलानि वृहत्योः पूतिकस्य च॥
गवेधुकस्य मूलानि तथा सहचरस्य च।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत्॥
पादशेषे रसे पूते गर्भं चैनं समावपेत्।
पुनर्नवा वचा दारु शताह्वा चन्दनागुरु॥
शैलेयं तगरं कुष्ठं एला मांसी स्थिरा वला।
अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च पेषयेत्।
गव्याजपयसः प्रस्थौ द्वौ दावत्र प्रदापयेत्॥
शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्।
अस्य तैलस्य सिद्धस्य शृणु वीर्य्यमतःपरम्॥
अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम्।
तैलमेतत् प्रयोक्तव्यं सर्व्ववातनिवारणम्॥
आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी तथा॥
हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्।
अपचीं गण्डमालाञ्च वातरक्तं हनुग्रहम्॥
कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाशयेत्।
तैलमेतद्भगवता विष्णुना परिकीर्त्तितम्।
नारायणमिति ख्यातं वातान्तकरणं शुभम्॥”
इति वृहन्नारायणतैलम्॥ २ ॥ * ॥
“विल्वाश्वगन्धा वृहती श्वदंष्ट्रा
श्योनाकवाट्यालकपारिभद्रम्।
क्षुद्रा कटिम्बातिवलाग्निमन्थं
मूलानि चैषां सरलीयुतानाम्॥
मूलं विदध्यादथ पाटलीनां
प्रत्येकमेषां प्रवदन्ति तज्ज्ञाः।
सपादप्रस्थं विधिनोद्धृताश्च
द्रोणैरपामष्टभिरेव पक्वा॥
पादावशेषेण रसेन तेन
तैलाढ़काभ्यां सममेव दुग्धम्।
छागस्य मांसद्रवमेव तुल्य-
मेकत्र सम्यग्विपचेत् सुबुद्धिः॥
दद्यादृसञ्चैव शतावरीणां
तैलेन तुल्यं पुनरेव तत्र।
रास्नाश्वगन्धा द्रुमदारु कुष्ठं
पर्णी चतुष्काशुरुकेशराणि॥
सिन्धूत्थमांसी रजनीद्वयञ्च
शैलेयकं चन्दनपुष्कराणि।
एला सयष्टी तगराब्दपत्रं
भृङ्गाह्ववर्गास्तु वचा पलाशम्॥
स्थौणेयवृश्चीरकचोरकाख्य-
मेभिः समस्तैर्द्विपलप्रमाणैः।
कर्पूरकाश्मीरमृगाण्डजानां
दद्यात् सुगन्धाय वदन्ति केचित्॥
प्रस्वेददौर्गन्ध्यनिवारणार्थं
चूर्णीकृतानां द्विपलप्रमाणम्।
आलोड्य सम्यग्विधिवद्विपक्वं
नारायणं नाम महच्च तैलम्॥ * ॥
सर्व्वैः प्रकारैर्विधिवत् प्रयोज्य-
मभ्यस्य पुंसां पवनार्द्दितानाम्।
ये पङ्गवः पीठविसर्पणाश्च
एकाङ्गहीनार्द्दितवेपमानाः।
वाधिर्य्यशुक्रक्षयपीड़िताश्च
मन्याहनुस्तम्भशिरोगदार्त्ताः।
सत्त्वा नरास्ते बलवर्णयुक्ताः
संसेव्य तैलं सहसा भवन्ति॥
वन्ध्या च नारी लभते च पुत्त्रं
वीरोपमं सर्व्वगुणोपपन्नम्।
शाखाश्रिते कोष्ठगते च वाते
वृद्धौ विधेयं पवनार्द्दितानाम्॥
जिह्वानिले दन्तगते च शूले
चोन्मादकौब्जे ज्वरकर्षितानाम्।
प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं
जीवेच्चिरं चापि भवेद्युवेव॥
देवासुरे युद्धवरे समीक्ष्य
क्षतायुधैर्भग्नानसुरैः सुरांश्च।
नारायणेनापि स्वदेहवृद्ध्यै
स्वनामतैलं विहितन्तु तेषाम्॥”
इति महानारायणतैलम्॥३॥ इति सुखबोधः॥
नारायणप्रियः, पुं, (नारायणस्य प्रियः। नारायणः प्रियो यस्य इति वा।) शिवः। यथा,—
“नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्॥”
इति शिवस्तोत्रम्॥
नारायणवलिः, पुं, (नारायणाय नारायणमुद्दिश्य देयो वलिः।) स्वतपतितादीनां प्रायश्चित्तात्मककर्म्मविशेषः। यथा। “नारायणवलिस्तु हेमाद्र्याद्यनुसारेणोच्यते। तत्रादौ क्रियानिबन्धे गारुड़े तर्पणमुक्तम्।
‘कार्य्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि।
दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्॥
अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अक्षयः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥’
इति शुक्लैकादश्यां देशकालौ सङ्कीर्त्त्य अमुकगोत्रस्यामुकस्य दुर्म्मरणात्मघातजदोषनाशार्थं और्द्ध्वदेहिके संप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणवलिं करिष्ये। इति सङ्कल्प्य ब्रह्माणं विष्णुं शिवं यमं प्रेतं पञ्चकुम्भेषु स्थापयेत्।
‘विष्णुः स्वर्णमयः कार्य्यो रुद्रस्ताम्रमयस्तथा।
ब्रह्मा रौप्यमयस्तत्र यमो लौहमयो भवेत्॥
प्रेतो दर्भमयः कार्य्यः।’ इति गारुड़ोक्तासु सर्व्वासु हैमीषु वा प्रतिमासु षोड़शोपचारैः पुरुषसूक्तेनाभ्यर्च्चणीं प्रतिष्ठाप्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेदमिति हुत्वा देवानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयुतान् दशपिण्डान् यज्ञोपवीतेव अमुकगोत्र अमुकशर्म्मन् प्रेत विष्णुरूपाय ते पिण्ड उपतिष्ठतामिति दत्त्वा कुशैः पुरुषसूक्तेनाभिमन्त्र्य यत्ते यममिति सूक्तेन पिण्डानुमन्त्र्य शङ्खोदकेन चाभिषिच्याभ्यर्च्च्यामुकशर्म्माणममुकगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एकमासान्नं ब्रह्मादिपञ्चभ्यो दद्यात्। मन्त्रस्तु।
‘ब्रह्मविष्णुमहादेवा यमश्चैव सकिङ्करः।
वलिं गृहीत्वा कुर्व्वन्तु प्रेतस्य च शुभां गति-
मिति॥’
मिताक्षरायान्तु होमवस्त्रादिना उक्तम्। ततः प्रतिदैवतं त्रिविधं फलं शर्करामधुगुड़युतानि च निवेद्य पिण्डानभ्यर्च्च्य नद्यां क्षिप्त्वा रात्रौ नव सप्त पञ्च वा विप्रान्निमन्त्र्योपोषितेन जागरणं कृत्वा श्वोभूते पुनर्विष्णुं यमं संपूज्यैकोद्दिष्टविधिना श्राद्धपञ्चकं करिष्ये इत्युक्त्वा ब्रह्मविष्णुशिवयमप्रेतान् स्मरन् विप्रान् उपविश्य प्रेतस्थाने चैकं विष्णुं स्मरन् आवाहनाद्यर्घ्ययुतं